१९

महावाक्यतात्पर्यविचारः

प्रस्तावना

धर्मः अर्थः कामः मोक्षः च इति चत्वारः पुरुषार्थाः सन्ति। एतेषु परमः पुरुषार्थः मोक्षः। मोक्षस्य तदुपायस्य च ज्ञानम् अलौकिकेनोपायेन एव भवति। तत्र ज्ञाने परमं प्रमाणं वेदाः एव। ऋग्यजुःसामाथर्वभेनदेन तेषां चातुर्विध्यम्। एतेभ्यो वेदेभ्यो मोक्षो ज्ञायते। स च मोक्षो जीवब्रह्मणोः ऐक्यज्ञानेनैव सम्भवति नान्यथा। इदम् ऐक्यज्ञानं च वेदेभ्य एव भवति। तादृशम् ऐक्यं चतुर्भिः वाक्यैः प्रतिपाद्यते। तानि वाक्यानि महावाक्यानि कथ्यन्ते। चतुर्षु वेदेषु चत्वारि महावाक्यानि सन्ति। ऋग्वेदे “प्रज्ञानं ब्रह्म” (३/१/३) इति महावाक्यम् अस्ति। यजुर्वेदे “अहं ब्रह्मास्मि” (१/४/१०) इति महावाक्यं शोभते। सामवेदे “तत्त्वमसि” इति महावाक्यं विद्यते। अथर्ववेदे “अयमात्मा ब्रह्म” इति महावाक्यं विद्यते। अस्मिन् पाठे ऋग्वेदीयं यजुर्वेदीयं च महावाक्यं विचार्यते।

उद्देश्यानि-

इमं पाठं पठित्वा भवान्-

- वेदान्तानां गुह्यं तत्त्वं किम् इति बोद्धुं शक्नुयात्।
- ब्रह्मशब्दार्थः कः इति जानीयात्।
- मनः कथं न इन्द्रियं भवति इति परिचिनुयात्।
- शब्दः कथम् अपरोक्षज्ञानस्य जनकः भवति इति अवगच्छेत्।
- ब्रह्मविद्गुरुः कीदृशः भवति इति वक्तुं शक्ष्यति।
- तात्पर्यनिर्णयाय षड्विधानां लिङ्गानि जानीयात्।
- अज्ञानं कीदृशं भवति इति अवगच्छेत्।
- बृहदारण्यकोपनिषदि किं महावाक्यं विद्यते इति जानीयात्।

१९.१) पाठविमर्शः

ब्रह्मणि एव सर्वेषां वेदान्तानां तात्पर्यम्। वेदान्तो नाम उपनिषद्। वेदस्य अन्तः नाम सिद्धान्तः यत्र विद्यते तद् वेदान्तनाम्ना अभिधीयते। उपनिषत् इति शब्दस्य रहस्यमर्थः। उपनिषदः अध्यात्मविद्यारहस्यं प्रतिपादयन्ति। पुनः च उपनिषत् इति शब्दस्य प्रसिद्धः अर्थः भवति ब्रह्मविद्या। एषः

अर्थः उपनिषदिति शब्दस्य व्युत्पत्त्या प्राप्यते। सदिति धातोः त्रयः अर्थाः सन्ति। विशरणं नाम विनाशः इत्यर्थः। गतिः इत्यस्य ज्ञानम् (विद्या) अर्थः भवति। अवसादनं नाम शैथिल्यम्। अत्र सद्धातोः गतिः इत्यर्थः स्वीक्रियते चेत् उपनिषच्छब्दस्य ब्रह्मविद्या इत्यर्थः भवति। उप इत्युपसर्गात् सामीप्यम् अवगम्यते। तस्मात् उपसर्गात् समीपतमः आत्मा सूच्यते। नि अर्थात् निश्चयरूपेण ब्रह्मणि एव जीवात्मानं प्रापयति या विद्या सा ब्रह्मविद्या। अतः एव शङ्कराचार्येण कठोपनिषदः भूमिकाभाष्ये उच्यते "पूर्वोक्तविशेषणान्मुमुक्षून् वा परं ब्रह्म गमयति इति ब्रह्मगमयितृत्वेन योगात् ब्रह्मविद्या उपनिषत्" इति। दश उपनिषदः प्रसिद्धाः सन्ति। ईशोपनिषत् केनोपनिषत् कठोपनिषत् प्रश्नोपनिषत् मुण्डकोपनिषत् माण्डूक्योपनिषत् तैत्तिरीयोपनिषत् ऐतरेयोपनिषत् छान्दोग्योपनिषत् बृहदारण्यकोपनिषत् च इति। तत्र ऋग्वेदीयायां ऐतरेयोपनिषदि "प्रज्ञानं ब्रह्म" (३/१/३) इति महावाक्यम् विद्यते। महावाक्यं नाम अखण्डार्थप्रतिपादकं वाक्यम्। जीव-ब्रह्मणोः अभेदार्थः यैः उपनिषद्वाक्यैः सूचितः तानि महावाक्यानि इत्युच्यन्ते। महदर्थप्रतिपादकत्वात् महावाक्यम् इति अभिधानम्। जीव-ब्रह्मणोः अभेदार्थः एवात्र महदर्थः। वाक्यानां तात्पर्यनिर्णयाय मीमांसाशास्त्रे षड्विधतात्पर्यग्राहकलिङ्गानि उपयुज्यन्ते। तैरेव तात्पर्यग्राहकलिङ्गैः वेदान्तवाक्यानां तात्पर्यं निर्णीयते। अतः महावाक्यानाम् तात्पर्यनिर्णयाय तात्पर्यलिङ्गानि आदौ विचार्यन्ते।

१९.२) लिङ्गानां परिचयः

उपक्रमोपसंहारौ अभ्यासः अपूर्वता फलम् अर्थवादः उपपत्तिः चेति षड्विधानि लिङ्गानि। आदौ यत् वदति अन्तिमे अपि तस्यैव कथनम् उपक्रमोपसंहारौ। आदौ अन्तिमे च एकः एव विषयः कथ्यते चेत् स एव प्रकरणस्य प्रतिपाद्यः विषयः। यथा- छान्दोग्योपनिषदि पिता उद्दालकः पुत्रं श्वेतकेतुं कथयति यत् "सदेव सोम्य इदम् अग्र आसीत्, एकमेवाद्वितीयम्" (६/२/१) इति। एवम् आरम्भे सद्ब्रह्म उपक्रम्य अन्तिमे उच्यते यत् "ऐतदात्म्यमिदं सर्वं तत् सत्यं स आत्मा तत्त्वमसि श्वेतकेतो" (६/८/७) इति।

द्वितीयं लिङ्गं तावत् अभ्यासः। प्रकरणे प्रतिपाद्यस्य विषयस्य पौनःपुन्येन प्रतिपादनम् अभ्यासः। यथा- छान्दोग्योपनिषदः षष्ठाध्याये "तत्त्वमसि" इति वाक्यं नववारं पठितम् अस्ति। ब्रह्म एव प्रतिपाद्यं वस्तु इति एतदेव सूचयितुं ब्रह्मणः नवकृत्वः कथनम्।

तृतीयं लिङ्गं तावत् अपूर्वता। प्रकरणे यत् वस्तु प्रतिपाद्यते तस्यैव वस्तुनः प्रमाणान्तरेण अविषयीकरणम् अपूर्वता। यथा - बृहदारण्यकोपनिषदि आम्नायते "तन्त्वौपनिषदं पुरुषं पृच्छामि" (३/९/२६) इति। अनया श्रुत्या ज्ञायते यत् उपनिषत्प्रमाणमात्रेण ज्ञेयं ब्रह्म। उपनिषदं विना ब्रह्म ज्ञातुं न शक्यते। वेदान्तसारस्य सुबोधिनीटीकायाम् उच्यते "'तन्त्वौपनिषदं पुरुषं पृच्छामि' इत्यादिश्रुतिभिः उपनिषन्मात्रवेद्यत्वप्रतिपादनात् ब्रह्मणः अपूर्वत्वम् इत्यर्थः। अथवा ब्रह्म स्वप्रकाशत्वेन स्वव्यवहारे स्वातिरिक्तप्रमाणानपेक्षत्वात् ब्रह्मणः अपूर्वत्वम् इत्यर्थः" इति।

चतुर्थं लिङ्गं तावत् फलम्। प्रकरणस्य प्रतिपाद्यः विषयः येषु स्थलेषु विद्यते तेषु स्थलेषु श्रूयमाणं प्रयोजनं फलम्। यथा- छान्दोग्योपनिषदः षष्ठाध्याये आम्नायते "आचार्यवान् पुरुषो वेद, तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ सम्पत्स्ये" (६/१४/२) इति। अस्यां श्रुतौ अद्वितीयब्रह्मज्ञानस्य

अद्वितीयब्रह्मप्राप्तिरेव फलम् इति उक्तम् अस्ति। एवं “ब्रह्मवित् ब्रह्मैव भवति” (मुण्डकोपनिषत् ३.२.९) “तरति शोकम् आत्मवित्” (छान्दोग्योपनिषत्७.१.३) च इत्यादिषु श्रुतिषु ब्रह्मात्मैकत्वविज्ञानमेव फलमिति कथितम्।

पञ्चमं लिङ्गं भवति अर्थवादः। प्रकरणे प्रतिपाद्यस्य वस्तुनः प्रतिपाद्यस्थले प्रशंसनम् अर्थवादः। यथा- छान्दोग्योपनिषदि आम्नायते - “उत तमादेशम् अप्राक्ष्यः येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातम्” (६/१/३) इति। अस्यां श्रुतौ अद्वितीयस्य वस्तुनः ब्रह्मणः प्रशंसा क्रियते।

षष्ठं लिङ्गं भवति उपपत्तिः। प्रकरणे येषु स्थलेषु यः अर्थः प्रतिपाद्यते तेषु स्थलेषु तस्य अर्थस्य साधने श्रूयमाणा युक्तिः उपपत्तिः। प्रपञ्चरूपस्य कार्यस्य मूलं कारणं ब्रह्म। अतः ब्रह्म विना प्रपञ्चस्य अतिरिक्ता कापि सत्ता नास्ति इति उपनिषदि मृत्तिकादिभिः दृष्टान्तैः आम्नातम्। यद्यपि अज्ञानवशात् पदार्थानां नानारूपेण प्रतीतिः भवति तथापि सर्वमिदम् अद्वितीयम् एकमेव ब्रह्म वस्तु इति उपनिषदि उक्तम्। अद्वितीयवस्तुनः ब्रह्मणः साधने विकारपदार्थस्य वाङ्मात्रत्वविषये युक्तिः तावत् “यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्यात् वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्” (छान्दोग्योपनिषत् ६.१.४) इति। अस्याः श्रुतेः अर्थः भवति मृत्पिण्डेन एव निर्मिताः गृहघटादयः। एते गृहघटादयः वस्तुतस्तु मृत्तिका एव। तथापि गृहघटादिभिः शब्दैः कथ्यते। तत्र मृत्तिका एव सत्यम्।

१९.३) प्रज्ञानं ब्रह्म

सर्वम् इदं ब्रह्म एव। ब्रह्मणः एव नामधेयानि एतानि सर्वाणि। अतः एव ऐतरेयोपनिषदि उच्यते “एष ब्रह्मैष इन्द्र एष प्रजापतिरेते सर्वे देवा इमानि च पञ्च महाभूतानि पृथिवी वायुराकाश आपो ज्योतींषीत्येतानीमानि च क्षुद्रमिश्राणीव बीजानि इतराणि चेतराणि चाण्डजानि च जारुजानि च स्वेदजानि चोद्भिजानि चाश्वा गावः पुरुषा हस्तिनो यत्किञ्चेदं प्राणि जङ्गमं च पतत्रि च यच्च स्थावरं सर्वं तत्प्रज्ञानेत्रम्। प्रज्ञाने प्रतिष्ठितं प्रज्ञानेत्रो लोकः प्रज्ञा प्रतिष्ठा प्रज्ञानं ब्रह्म” (३/१/१) इति।

ब्रह्मणः इदं जगत् विवर्तरूपम्। अतत्त्वतः अन्यथाप्रथा विवर्तः कथ्यते। ययोः द्वयोः सत्ता परस्परं भिद्यते तयोः विवर्तभावः। यथा- ब्रह्मणः पारमार्थिकी सत्ता, जगतः व्यवहारिकी सत्ता। अतः ब्रह्मणः विवर्तरूपमिदं जगत्। सिद्धान्तलेशसङ्ग्रहे कथ्यते “ब्रह्मणश्च उपादानत्वम् अद्वितीयकूटस्थचैतन्यरूपस्य न परमाणूनाम् इव आरम्भकत्वरूपम्, न वा प्रकृतेरिव परिणामित्वरूपम्, किन्तु अविद्यया वियदादिप्रपञ्चरूपेण विवर्त्तमानत्वलक्षणम्। वस्तुनः तत्समसत्ताकः अन्यथाभावः परिणामः, तदसमसत्ताकः विवर्त्त इति वा, कारणसलक्षणः अन्यथाभावः परिणामः, तद्विलक्षणः विवर्त्त इति वा, कारणाभिन्नं कार्यं परिणामः, तदभेदं विना तद्व्यतिरिक्तेन दुर्वचं कार्यं विवर्त्त इति वा विवर्त्तपरिणामयोः विवेकः” इति। सर्वेषु शरीरेषु स्थितः प्राणः प्रज्ञारूपः आत्मा। प्रथममेव जातः शरीरी प्रजापतिः आत्मा एव। इन्द्राग्न्यादयः सर्वे देवा ब्रह्मणः एव विवर्तरूपाः भवन्ति। पृथिवी आपः तेजः वायुराकाशः चेति पञ्चमहाभूतानि तस्मादेव जातानि। क्षुद्रजीवैः सह तत्कारणानि सर्पादीनि बीजानि, अण्डेभ्यः जातानि पक्ष्यादीनि, जरायुजेभ्यः जातानि मनुष्यादीनि, स्वेदेभ्यः जातानि यूकमशकादीनि उद्भिज्जानि वृक्षादीनि, अश्वाः गावः हस्तिनः च ब्रह्मणः एव उत्पद्यन्ते। सर्वमिदं प्रज्ञानेत्रम्। यतो हि

प्रज्ञया एव सर्वं नीयते। शङ्कराचार्येण अत्र उच्यते "सर्वं तदशेषतः प्रज्ञानेत्रम्। प्रज्ञप्तिः प्रज्ञा तच्च ब्रह्मैव। नीयते अनेन इति नेत्रम्। प्रज्ञा नेत्रं यस्य तदिदं प्रज्ञानेत्रम्। प्रज्ञाने ब्रह्मणि उत्पत्तिस्थितिलयकालेषु प्रतिष्ठितं प्रज्ञायमित्यर्थः। प्रज्ञानेत्रो लोकः पूर्ववत्। प्रज्ञाचक्षुर्वा सर्व एव लोकः प्रज्ञा प्रतिष्ठा सर्वस्य जगतः। तस्मात् प्रज्ञानं ब्रह्म" इति। सङ्कल्पविकल्पात्मकम् अन्तःकरणं चक्षुरादिभिः इन्द्रियैः निर्गत्य घटादिविषयदेशं प्रति गत्वा घटादिविषयाकारेण यदा परिणमते तदा स परिणामविशेषः वेदान्ते वृत्तिरुच्यते।

१९.३.१) प्रज्ञानशब्दार्थः-

पुरुषः चक्षुर्द्वारा निर्गतेन येन अन्तःकरणवृत्त्युपहितचैतन्येन दर्शनयोग्यं रूपादिकं पश्यति, तथैव श्रोत्रेन्द्रियेण निर्गतेन येन अन्तःकरणवृत्त्युपहितचैतन्येन शब्दजातं शृणोति, वागिन्द्रियेण निर्गतेन येन अन्तःकरणवृत्त्युपहितचैतन्येन शब्दजातं व्याहरति, घ्राणेन्द्रियेण निर्गतेन येन अन्तःकरणवृत्त्युपहितचैतन्येन गन्धसमूहान् जिघ्रति, रसनेन्द्रियेण निर्गतेन येन अन्तःकरणवृत्त्युपहितचैतन्येन स्वादु अस्वादु च विजानाति, तथा च अत्र उक्तानुक्तैः सकलैः इन्द्रियैः अन्तःकरणवृत्तिभेदैः उपलक्षितं चैतन्यमेव प्रज्ञानम्। अतः एव पञ्चदशीकारेण विद्यारण्यस्वामिणा महावाक्यविवेकप्रकरणे उच्यते-

"येनेक्षते श्रृणोतीदं जिघ्रति व्याकरोति च।

स्वाद्वस्वादू च विजानाति तत्प्रज्ञानमुदीरितम्॥" (५/१) इति।

कौषितक्युपनिषदि अपि आम्नायते -

"प्रज्ञया वाचं समारुह्य वाचा सर्वाणि नामानि आप्नोति।

प्रज्ञया चक्षुः समारुह्य चक्षुषा सर्वाणि रूपाणि आप्नोति" (३/६) इति।

बृहदारण्यकोपनिषदि आम्नायते "मनसा ह्येव पश्यति मनसा शृणोति हृदयेन हि रूपाणि जानाति" (१/५/३) इत्यत्र मनःआदिशब्देन चैतन्यरूपं प्रज्ञानमेव उक्तम्। मनआदीनि प्रज्ञानस्य नामधेयानि भवन्ति। अतः एव ऐतरेयोपनिषदि आम्नायते -

"यदेतद्धृदयं मनश्चैतत्। संज्ञानमाज्ञानं विज्ञानं प्रज्ञानं मेधा दृष्टिर्धृतिर्मतिर्मनीषा जूतिः स्मृतिः सङ्कल्पः क्रतुरसुः कामो वश इति सर्वाण्येवैतानि प्रज्ञानस्य नामधेयानि भवन्ति" (३/१/२) इति।

१९.३.२) ब्रह्मशब्दार्थः-

एवं प्रज्ञानशब्दस्य अर्थम् उक्त्वा विद्यारण्यस्वामिणा पञ्चदश्यां ब्रह्मशब्दस्यार्थः कथ्यते-

"चतुर्मुखेन्द्रदेवेषु मनुष्याश्वगवादिषु।

चैतन्यमेकं ब्रह्मातः प्रज्ञानं ब्रह्ममय्यपि॥" (५/२) इति।

जगज्जन्मस्थितिलयकारणं यत् चैतन्यं उत्तमदेवादिषु, मध्यममनुष्यादिषु, अधमेषु अश्वादिषु पृथिव्यादिषु च भूतेषु अस्ति तत् ब्रह्म एव। सर्वेषु चैतन्यस्वरूपं ब्रह्म अनुस्यूतं वर्तते। सर्वत्रावस्थितं प्रज्ञानं ब्रह्म एव। ब्रह्मणः जगज्जन्मादिकारणत्वे श्रुतिः प्रमाणम्। तैत्तिरीयोपनिषद्गता श्रुतिः भवति -

"यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति।

यत्प्रयन्ति अभिसंविशन्ति। तद्विजिज्ञासस्व। तद्ब्रह्मेति। " (३/१) इति।

अतः ज्ञायते यत् ब्रह्मणि जगज्जन्मादिकारणत्वम् अस्ति। अत्र जगत्पदेन सर्वं कार्यजातं विवक्षितम्। अखिलकार्यजातस्य एकमेव कारणम् अद्वितीयं ब्रह्म। कारणपदेन ब्रह्मणि कर्तृत्वम् अस्ति इति निगदितम्। कार्यं प्रति यानि उपादानकारणानि सन्ति तेषां कारणानाम् अपरोक्षज्ञानं यस्मिन् अस्ति, कार्यं कर्तुम् इच्छा कार्यकरणानुकूलप्रयत्नः च यस्मिन् विद्यते स कर्ता भवति। परमेश्वरे ब्रह्मणि एतत् सर्वम् अस्ति। अतः परमेश्वरे कर्तृत्वम् अस्ति एव। वेदान्तपरिभाषायां धर्मराजाध्वरीन्द्रेण कथ्यते "कर्तृत्वं च तत्तदुपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वम्" इति। अत्र ब्रह्मणः नव तटस्थलक्षणानि (वेदान्तपरिभाषायां निगद्यते– "तटस्थलक्षणं तु यावल्लक्ष्यकालमनवस्थितत्वे सति यद्व्यावर्तकं तदेव यथा गन्धवत्त्वं पृथ्वीलक्षणम्" इति।) वक्तुं शक्यन्ते। तानि लक्षणानि भवन्ति-

१) जगज्जन्मानुकूलापरोक्षज्ञानवत्त्वम्

२) जगत्स्थित्यनुकूलापरोक्षज्ञानवत्त्वम्

३) जगल्लयानुकूलापरोक्षज्ञानवत्त्वम्

४) जगज्जन्मानुकूलचिकीर्षावत्त्वम्

५) जगत्स्थित्यनुकूलचिकीर्षावत्त्वम्

६) जगल्लयानुकूलचिकीर्षावत्त्वम्

७) जगज्जन्मानुकूलप्रयत्नवत्त्वम्

८) जगत्स्थित्यनुकूलप्रयत्नवत्त्वम्

९) जगल्लयानुकूलप्रयत्नवत्त्वम्

एवं ब्रह्मशब्दार्थम् उक्त्वा यजुर्वेदस्य बृहदारण्यकोपनिषद्गतं महावाक्यं विचार्यते।

१९.४) अहं ब्रह्मास्मि

बृहदारण्यकोपनिषदि आम्नायते "अहं ब्रह्मास्मि" (१/४/१०) इति। विद्याप्राप्त्यर्थम् इष्टदेवस्य आराधना यथा क्रियते तथैव गुरोः आराधना अपि विद्याप्राप्त्यर्थं क्रियते। अत्र विद्या नाम शास्त्रेण प्रतिपाद्यस्य अर्थस्य यथार्थतया बोधः। तादृशः यथार्थतया बोधः निर्विघ्नेन निष्ठापूर्वकं शास्त्राध्ययनम् अपेक्षते। निर्मलचित्तस्य पुरुषस्य शास्त्राध्ययने श्रद्धा भवति। इष्टदेवस्य कृपां विना चित्तं कदापि निर्मलं न भवति। केवलं देवानुग्रहवशात् शास्त्रस्य यथार्थज्ञानं न भवति। यावत्पर्यन्तं गुरोः कृपा न भवति तावत्पर्यन्तं शास्त्रस्य यथार्थज्ञानं न भवति। अतः गुरोः आराधना कर्तव्या। श्वेताश्वतरोपनिषदि उच्यते-

"यस्य देवे परा भक्तिः यथा देवे तथा गुरौ।

तस्य ह्येते कथितार्थाः प्रकाशयन्ते महात्मनः॥" (६/२३) इति।

पुराणकारेणापि कथ्यते-

"गकारः सिद्धिदः प्रोक्तो रेफः पापस्य दाहकः।

उकारो विष्णुरव्यक्तस्त्रितयात्मा गुरुः परः॥" इति।

गुरुशब्दः वर्णत्रयात्मकः। गकारस्य सिद्धिदातृत्वमर्थः, रकारस्य पापदाहकत्वमर्थः, उकारस्य पालकत्वमर्थः। गुरुः शिष्यस्य पापक्षालनं करोति। शङ्कराचार्येण उपदेशसाहस्यां निगद्यते-

"विद्यया तारिताः स्मो यैर्जन्ममृत्युमहोदधिम्।

सर्वज्ञेभ्यो नमस्तेभ्यो गुरुभ्योऽज्ञानसङ्कुलम्॥

वेदान्तवाक्यपुष्पेभ्यो ज्ञानामृतमधूत्तमम्।

उज्जहारालिवैद्यो नस्तस्मै सद्गुरवे नमः॥" (२०३) इति।

गुरुः श्रद्धावतः अन्तेवासिनः हृदये ज्ञानरूपं प्रदीपं प्रज्वाल्य अज्ञानं नाशयति। स्वबुद्ध्या परमात्मानं यः ज्ञातुम् इच्छति स अज्ञाने निमज्जति। शास्त्रपारदर्शिभिरपि स्वतन्त्रतया ब्रह्मज्ञानस्य अन्वेषणं न करणीयम्। अत एव शङ्कराचार्येण मुण्डकोपनिषद्भाष्ये उच्यते- "शास्त्रज्ञोऽपि स्वातन्त्रेण ब्रह्मज्ञानान्वेषणं न कुर्यात् इत्येतत् गुरुमेव इति अवधारणफलम्" इति। पुनरपि गुरोः माहात्म्यविषये उच्यते-

"गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः।

गुरुरेव परं तत्त्वं तस्मात् गुरुमुपाश्रयेत्॥" इति।

अतः एव गुरोः सकाशात् उपदेशप्राप्त्यर्थं शिष्यः गुरोः शरणं प्राप्नोति। गुरुः निर्मलचित्ताय शमदमादिसम्पन्नाय शिष्याय ब्रह्मविद्याम् उपदिशति। मुण्डकोपनिषदि श्रूयते-

"तस्मै स विद्वान् उपसन्नाय सम्यक् प्रशान्तचित्ताय शमान्विताय।

येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्याम्॥" (१/१/३) इति।

शमादयः नाम शमः दमः उपरतिः तितिक्षा समाधानं श्रद्धा च इति षट्। यदा बुभुक्षा अतितीव्रा भवति तदा भोजनं विहाय अन्यत् किञ्चित् अपि मनसे न रोचते, भोजने किञ्चिदपि विलम्बः सोढुं न शक्यते। एवम् एव यदा पूर्वसंस्कारवशात् मालाचन्दनभार्यापुत्रगृहक्षेत्रपशुषु गम्यमानं मनः येन अन्तःकरणनिवृत्तिविशेषेण निगृह्यते तादृशः वृत्तिविशेषः शमः कथ्यते। पुनः ज्ञानसाधनभिन्नेभ्यः शब्दास्पर्शरूपरसादिविषयेभ्यः श्रोत्रादीनि बाह्येन्द्रियाणि येन वृत्तिविशेषेण निगृह्यन्ते स वृत्तिविशेषः दमः भवति। शमः दमः च येन साधितः तस्य स्थितप्रज्ञस्य पुरुषस्य सकाशे ब्रह्मज्ञानस्य मार्गः उन्मुक्तः भवति। श्रीमद्भगवद्गीतायाम् भगवता श्रीकृष्णेन निगद्यते-

"यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः।

इन्द्रियाणीन्द्रियार्थेभ्यः तस्य प्रज्ञा प्रतिष्ठिता॥" (२/५८) **इति।**

उपरतिः नाम निगृहीतानां बाह्येन्द्रियाणां मनसः च आत्मविषयकश्रवणादिषु स्थिरीकरणम् अथवा विहितानां नित्यकर्मादीनां विधिना परित्यागः। अत्र सर्वकर्मसन्न्यासः एव इष्टः। सर्वतः निवृत्तचित्तः पुरुषः सुखदुःखशीतोष्णप्रेमघृणादिषु देहादिषु अनात्मवस्तुधर्मेषु उदासीनः भवति। शीतोष्णादिद्वन्द्वसहिष्णुता एव तितिक्षा। आत्मविषये अनवरतम् अनुचिन्तनं समाधिः अर्थात् समाधानम्। गुरुणा उपदिष्टानि यानि वेदान्तवाक्यानि तेषु वाक्येषु विश्वासः श्रद्धा। ब्रह्मविद्गुरुः तादृशाय शिष्याय तत्त्वमस्यादिवाक्यम् उपदिशति। अस्मासु श्रद्धा अवश्यं भवेत्। कारणं हि श्रद्धा नास्ति चेत् कार्यं सफलतां न प्राप्नोति। अतः एव भगवता श्रीकृष्णेन श्रीमद्भगवद्गीतायां निगद्यते-

"अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत्।

असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह॥" (१७/२८) **इति।**

१९.५) अहमाकारा वृत्तिः

ततः परं शिष्यस्य अहं नित्यशुद्धबुद्धमुक्तसत्यस्वभावं परमानन्दानन्ताद्वयं ब्रह्म अस्मीति अखण्डाकाराकारिता चित्तवृत्तिः उदेति। परमात्मा अहं सर्वदा एव विद्यमानः अस्मीति शिष्यस्य अनुभवो भवति। मम जन्म नास्ति, मम विनाशः नास्ति, अज्ञानं नास्ति, दुःखस्पर्शः नास्ति, नानात्वं नास्ति इत्येवं शिष्यस्य अपरोक्षानुभवो भवति। कारणं हि ब्रह्म अपरोक्षस्वभावं भवति। बृहदारण्यकोपनिषदि आम्नातम् अस्ति "यत्साक्षादपरोक्षाद्ब्रह्म" (३/४/१) इति। अतः शिष्यस्य अनुभवः अपरोक्षः एव। अधुना संशयः भवति यत् इन्द्रियजन्यं ज्ञानमेव प्रत्यक्षं भवति। शब्दः तु अपरोक्षज्ञानस्य जनकः भवति। यदि शब्दः प्रत्यक्षज्ञानस्य जनकः भवति तर्हि 'पर्वते वह्निरस्ति' इत्यस्मात् वाक्यात् अग्नेः प्रत्यक्षं ज्ञानम् उदितं स्यात्। तस्मात् वाक्यात् अग्नेः प्रत्यक्षं ज्ञानं न भवति। एवं संशये सति अद्वैतिनः कथयन्ति प्रत्यक्षं न केवलम् इन्द्रियनिर्भरशीलम्। अपि तु विषयनिर्भरशीलम्। इन्द्रियजन्यं ज्ञानमेव प्रत्यक्षम् इति स्वीक्रियते चेत् सुखदुःखादिकं यथा प्रत्यक्षं भवति तथैव सुखदुःखादादीनां स्मृतिरपि प्रत्यक्षा भवति इति अङ्गीकार्यम्। वायुः रूपहीनः भवति। अतः वायुः चाक्षुषप्रत्यक्षः न भवति। घटरूपमपि रूपहीनं भवति। कारणं हि रूपे रूपमस्ति इति स्वीक्रियते चेत् अनवस्थादोषः भविष्यति। घटरूपम्, घटगतसंख्या चाक्षुषप्रत्यक्षा भवति इति स्वीक्रियते। अतः किं वस्तु प्रत्यक्षं भवति, किं न भवति इत्यत्र वस्तुस्वभावः एव नियामकः। शब्दः अपि क्वचित् अपरोक्षज्ञानम् उत्पादयितुं समर्थः अस्ति। यथा दशजनाः नद्याः अपरतीरात् ततः विपरीततीरम् आगतवन्तः। दशजनाः एव सन्ति न वा इति निश्चेतुं तेषु कश्चन स्वेषां गणनां करोति। किन्तु स स्वं विहाय नवजनानां गणनां कृतवान्। तदा स चिन्तितवान् यत् अवशिष्टः एकः जनः कुत्र गतः इति। तदा तेषु एव कश्चन कथयति- भोः! दशमः त्वम् असि। तदा तस्य ज्ञानं जातं यत् दशमः अहमस्मि इति। ततः परं ते दशजनाः आनन्देन गतवन्तः। एवं शब्दसमूहः अपि अपरोक्षज्ञानजनको भवति।

१९.६) मनसः अनिन्द्रियत्वम्-

ननु ब्रह्म इन्द्रियगोचरं खलु। बृहदारण्यकोपनिषदि आम्नायते "मनसैवानुद्रष्टव्यम्" (४/४/१९) इति। मनसा एव ब्रह्मदर्शनं कर्तव्यम्। मनश्च इन्द्रियं भवति। अन्नम्भट्टेन तर्कसङ्ग्रहे उच्यते "सुखाद्युपलब्धिसाधनमिन्द्रियं मनः" इति। श्रीमद्भगवद्गीतायामपि कथ्यते-

"ममैवांशो जीवलोके जीवभूतः सनातनः।

मनःषष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति॥" (१५/७) इति।

अतः मनः इन्द्रियं भवति इति आशङ्कायामुच्यते मनः न इन्द्रियम्। कारणं हि मनसः इन्द्रियत्वे प्रमाणं नास्ति। श्रीमद्भगवद्गीतायां षट्त्वसंङ्ख्यापूरणाय अनिन्द्रियस्य मनसः इन्द्रियत्वेन कथनमस्ति। एवम् अवेदेन अपि महाभारतेन वेदगतपञ्चत्वसङ्ख्यापूरणं दृष्टमस्ति। यथा 'वेदान् अध्यापयामास महाभारतपञ्चमान्' इति। कठोपनिषदपि मनसः अनिन्द्रियत्वं कथयति। यथा-

"इन्द्रियेभ्यः पराः ह्यर्था अर्थेभ्यश्च परं मनः।

मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः॥" (१/३/१०) इति।

अस्यां श्रुतौ इन्द्रियेभ्यः पृथक्त्वेन मनसः ग्रहणं कृतम् अस्ति। इन्द्रियेभ्यः अपि विषयाः श्रेष्ठाः, विषयेभ्यः मनः श्रेष्ठम्, मनसः अपि बुद्धिः श्रेष्ठा, बुद्धेरपि महान् आत्मा श्रेष्ठः भवति। अनिन्द्रियेण शमदमादिसंस्कृतेन शुद्धेन मनसा ब्रह्म प्रत्यक्षं भवति। अत एव शङ्कराचार्येण श्रीमद्भगवद्गीताभाष्ये निगद्यते "शास्त्राचार्योपदेशजनितशमदमादिसंस्कृतं मनः आत्मदर्शने करणम्" (२/२१) इति।

१९.७) ब्रह्मज्ञानस्य अज्ञाननाशकत्वम्

ननु अद्वैतवेदान्ते ब्रह्म निर्विशेषं निराकारञ्च भवति। निराकारस्य ब्रह्मणः आकारधारणम् अयुक्तं खलु। एवं संशये सति समाधानं कथयति यत् अखण्डाकाराकारिता चित्तवृत्तिः इत्यत्र आकारशब्दस्य स्वार्थे तात्पर्यं नास्ति। अपि तु बह्व्यः वृत्तयः सन्ति। तासां वृत्तीनां परस्परं भेददर्शनार्थम् आकारशब्दः प्रयुक्तः। या वृत्तिः यद्विषयस्य अज्ञानस्य निवर्तिका भवति सा वृत्तिः तद्विषयाकारा भवति। या वृत्तिः घटविषयकम् अज्ञानं नाशयति सा वृत्तिः घटाकाराकारिता भवति। अतः अत्र अखण्डाकारवृत्तिः नाम अखण्डब्रह्मणा सह सम्बन्धवशात् चित्तस्य परिणामविशेषः। अखण्डाकारवृत्तिः अखण्डब्रह्मगतम् अज्ञानं नाशयति। वृत्तिः जडा भवति। अतः वृत्तिः स्वतः अज्ञानं नाशयितुं न शक्नोति। चैतन्यप्रतिबिम्बयुक्ता सती वृत्तिः अज्ञानं नाशयति। निर्मले अन्तःकरणे यदा चैतन्यं प्रतिबिम्बितं भवति तदा अन्तःकरणं प्रकाशशीलं सत् अज्ञानं नाशयति। वस्तुतस्तु चैतन्यमेव अज्ञानस्य नाशकं भवति। किन्तु स्वतः न अज्ञानं नाशयति। अपि तु वृत्तिमाध्यमेन अज्ञानं नाशयति। यथा- सूर्यस्य आतपः स्वतः तृणादीनां नाशकः न भवति। सूर्यकान्तमणौ प्रतिफलितः सन् आतपः तृणादिकं नाशयति। अधुना संशयो भवति जडा वृत्तिः चित्प्रतिबिम्बिता सती अज्ञानम् अज्ञानकार्यं च नाशयति। ततः परं सा वृत्तिः तु न नश्यति। अतः वृत्तेः नाशकान्तराभावात् वृत्तिस्तु तिष्ठति एव। अतः मोक्षदशायां वृत्तेरपि विद्यमानात् एकमेव अद्वितीयं तत्त्वम् अनुपपन्नं भवति। एवं संशये सति समाधानम् उच्यते - पटस्य उपादानकारणानि तन्तवः भवन्ति। तन्तवः

दग्धाः भवन्ति चेत् तन्तुकार्यं पटोऽपि दग्धः भवति। एवमेव प्रपञ्चरूपस्य अखिलस्य कार्यस्य कारणम् अज्ञानं नष्टं चेत् अज्ञानकार्याणाम् अपि नाशः भवति। वृत्तिरपि अज्ञानकार्यमेव। अतः अज्ञाने नाशे सति अज्ञानकार्यस्य वृत्तेरपि नाशः भवति। जडपदार्थस्य आकारेण आकारिता चित्तवृत्तिः अखण्डवृत्त्या साकं भिद्यते। यथा- अयं घटः इत्यत्र घटाकाराकारिता चित्तवृत्तिः अज्ञानविषयीभूतं घटावच्छिन्नं चैतन्यं विषयीकृत्य घटावच्छिन्नचैतन्यगतम् अज्ञानं नाशयित्वा स्वगतचिदाभासेन जडं घटमपि प्रकाशयति। अतः एव पञ्चदश्यां निगदितं-

"बुद्धितत्स्थचिदाभासौ द्वावपि व्याप्नुतो घटम्।

तत्राज्ञानं धिया नश्येत् आभासेन घटः स्फुरेत्॥" (७/९१) **इति।**

अस्य श्लोकस्यार्थस्तावत् बुद्धिः बुद्धिस्थं च चैतन्यप्रतिबिम्बम् उभयमपि घटं व्याप्नोति। तत्र बुद्धिवृत्त्या घटगतम् अज्ञानं नश्यति। पुनः प्रतिबिम्बेन घटः प्रकाश्यते। यथा- प्रदीपस्य आलोकः अन्धकारे विद्यमानं घटं विषयीकृत्य अन्धकारं नाशयति। ततः परम् आलोकेन घटः प्रकाश्यते।

ननु वृत्तिः नश्यति चेत् अपि वृत्तिजन्यः चिदाभासः तिष्ठति एव। अज्ञाने नष्टे चैतन्यमात्रं विराजते। तत् चैतन्यं न कार्यम्, नापि कारणं भवति। तत् चैतन्यं तु चिदाभासं नाशयितुं न शक्नोति। अतः अद्वैतहानिः खलु इति चेदुच्यते तन्न भवति। कारणं हि यथा- अग्निः काष्ठखण्डम् आश्रित्य नगरं नाशयति। अन्तिमे स्वाश्रितं काष्ठखण्डं नाशयित्वा स्वयमपि नश्यति। तथैव चिदाभासः अपि अखण्डब्रह्मगतम् अज्ञानं नाशयित्वा अन्तिमे स्वयमेव निवृत्तं भवति। पुनश्च उपाधिः नश्यति चेत् प्रतिबिम्बः बिम्बरूपः एव भवति। यथा- दर्पणः विनष्टः चेत् दर्पणस्थः मुखप्रतिबिम्बः बिम्बेन साकम् अभिन्नः भवति। एवमेव वृत्तिः यदा नश्यति तदा चैतन्यप्रतिबिम्बः बिम्बभूतेन चैतन्येन साकम् अभिन्नः भवति। बिम्बभूतस्य चैतन्यस्य कदापि नाशः न भवति। अतः एव सिद्धान्तलेशसङ्ग्रहे उच्यते "अविनाशी वा अरे अयमात्मा इति श्रवणं जीवस्य तदुपाधिनिवृत्तौ प्रतिबिम्बभावापगमे अपि स्वरूपं न विनश्यति इत्येतत्परं न तदतिरिक्तकूटस्थनामचैतन्यान्तरपरम्" इति। प्रतिबिम्बस्य बिम्बातिरिक्ता कापि सत्ता नास्ति। अतः अद्वैततत्त्वम् उपपन्नं भवति। अत्र ज्ञातव्यं यत् चिदाभासः चैतन्यस्वरूपं ब्रह्म प्रकाशयितुं न शक्नोति। यथा- प्रदीपप्रभा सूर्यप्रभां प्रकाशयितुं न शक्नोति। ब्रह्म स्वयं प्रकाशमानं भवति। तस्मात् ब्रह्म प्रकाशयितुं चिदाभासस्य उपयोगः एव नास्ति। अतः एव विद्यारण्यस्वामिणा पञ्चदश्यां निगद्यते-

"ब्रह्मणि अज्ञाननाशाय वृत्तिव्याप्तिरपेक्षिता।

स्वयंस्फुरणमात्रत्वान्नाभास उपयुज्यते॥" (७/९२) **इति।**

ब्रह्म एव सर्वं प्रकाशयति। मुण्डकोपनिषदि आम्नायते-

"न तत्र सूर्यो भाति न चन्द्रतारकं

नेमा विद्युतो भान्ति कुतोऽयमग्निः।

तमेव भान्तम् अनुभाति सर्वं

तस्य भासा सर्वमिदं विभाति॥" (२/२/१०) **इति।**

यः सूर्यः सर्वान् प्रकाशयति स सूर्यः अपि ब्रह्मणि न भाति। अर्थात् स सूर्यः ब्रह्म प्रकाशयितुं न शक्नोति। अपि तु ब्रह्मणः प्रकाशः सूर्यादीन् सर्वान् प्रकाशयति। तस्यैव प्रकाशेन सर्वे प्रकाशमानाः भवन्ति। तदेव प्रकाशस्वरूपं ब्रह्म अत्र 'अहं'पदेन परिलक्ष्यते। विद्यारण्यस्वामिणा पञ्चदश्यां कथ्यते-

"परिपूर्णः परमात्मास्मिन् देहे विद्याधिकारिणि।

बुद्धेः साक्षितया स्थित्वा स्फुरन्नहमितीर्यते॥"

स्वतःपूर्णः परमात्मात्र ब्रह्मशब्देन निगदितः।

अस्मीत्यैक्यपरामर्शस्तेन ब्रह्म भवाम्यहम्॥" (५/३,४) **इति।**

अनयोः श्लोकयोः अर्थस्तावत् देशेन कालेन वस्तुना च अपरिच्छिन्नः आत्मा। तादृशः अपरिच्छिन्नः, सर्वत्र एव व्याप्तः परमात्मा मायाकल्पिते अस्मिन् जगति विद्यालाभयोग्येषु श्रवणमनननिदिध्यासनानुष्ठानवत्सु मनुष्यादिशरीरेषु साक्षितया स्थित्वा सर्वदा प्रकाशमानः तिष्ठति। श्लोकोक्तेन बुद्धिपदेन सूक्ष्मशरीरं निगदितम्। "अहं ब्रह्मास्मि" (बृहदारण्यकोपनिषत्-१/४/१०) इत्यत्र अस्मीति पदेन जीवब्रह्मणोः ऐक्यं सूचितम्।

पाठगतप्रश्नाः

१. ऋग्वेदस्य महावाक्यं किम्?

२. यजुर्वेदस्य महावाक्यं किम्?

३. षड्विधानि लिङ्गानि कानि?

४. मनः न इन्द्रियम् इत्यत्र का श्रुतिः?

५. अर्थवादः नाम किम्?

६. महावाक्यं नाम किम्?

७. अरोक्षस्वभावं ब्रह्म इत्यत्र का श्रुतिः?

८. उपनिषत् इति शब्दस्य अर्थः कः?

९. देशेन कालेन वस्तुना च किं न परिच्छिद्यते?

पाठसारः-

सर्वासाम् उपनिषदां ब्रह्मणि एव तात्पर्यम्। जीवस्य ब्रह्मणा साकम् ऐक्यप्रतिपादनम् एव वेदान्तानां विषयः। सर्वम् इदं ब्रह्मणः एव समुत्पन्नम्। इदन्ततया अत्र जगत् उच्यते। अस्य जगतः उत्पत्तिः ब्रह्मणः एव भवति। जगतः स्थितिः ब्रह्मणि एव भवति। जगतः लयः ब्रह्मणि एव भवति। चत्वारः पुरुषार्थाः सन्ति। तेषु परमः पुरुषार्थः मोक्षः। उपनिषत्प्रतिपाद्यं मोक्षस्वरूपं ब्रह्म। प्रसिद्धानाम् उपनिषदां मध्ये ऋग्वेदस्य ऐतरेयोपनिषदि "प्रज्ञानं ब्रह्म" इति महावाक्यं विद्यते। प्रज्ञानशब्देन अत्र चैतन्यम् उच्यते। तच्चैतन्यं सर्वत्र एव अनुस्यूतं वर्तते। बृहदारण्यकोपनिषदि "अहं ब्रह्मास्मि" इति महावाक्यम् अस्ति। महावाक्यानि जीवस्य ब्रह्मणः च ऐक्यं प्रतिपादयन्ति। निर्विशेषं निरवयवं प्रकाशस्वरूपं ब्रह्म भवति। ब्रह्मणः एव प्रकाशः सर्वं प्रकाशयति। सूर्यचन्द्रादयः अपि ब्रह्मणा एव प्रकाशिताः भवन्ति। तत् ब्रह्म अस्माभिः सर्वैः प्राप्तव्यम् अस्ति। अतः ब्रह्मप्राप्तये ब्रह्मविदः गुरोः सकाशं गमनीयम् अस्ति। कारणं हि गुरुः अविद्यां नाशयति। विद्याप्राप्त्यर्थम् इष्टदेवस्य आराधना यथा क्रियते तथैव गुरोः आराधना अपि विद्याप्राप्त्यर्थं क्रियते। विद्यया अमृतं लभते। अर्थात् मुक्तिः प्राप्यते। अद्वैते मुक्तिः द्विविधा भवति। जीवन्मुक्तिः विदेहमुक्तिः च। अखण्डब्रह्मज्ञानेन ब्रह्मविषयकम् अज्ञानं नश्यति। तदा ब्रह्मसाक्षात्कारे सति अज्ञानकार्याणां प्रपञ्चादीनां संशयविपर्ययादीनां च बाधः भवति। ततः परं पुरुषः सर्वबन्धनरहितः सन् ब्रह्मनिष्ठः जीवन्मुक्तः भवति। मुण्डकोपनिषदि अपि आम्नायते -

> **"भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः।**
>
> **क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे॥"** (२/२/९) **इति।**

अविद्यावासनामयाः कामाः ये सन्ति, तेषां कामानाम्, ज्ञेयविषये विद्यमानानां संशयानां च नाशः ब्रह्मनिष्ठस्य पुरुषस्य भवति। पुनश्च तस्य जीवन्मुक्तस्य पुरुषस्य ज्ञानोत्पत्तेः पूर्वं यानि कर्माणि सन्ति, जन्मान्तरे च यानि कर्माणि फलदाने अप्रवृत्तानि सन्ति, तेषां कर्मणां नाशः भवति। स जीवन्मुक्तः पुरुषः इच्छया अनिच्छया परेच्छया वा प्रारब्धकर्मणः फलम् अनुभवति। यदा प्रारब्धकर्मणः क्षयः भवति तदा आनन्दस्वरूपे परब्रह्मणि तस्य प्राणाः लीयन्ते। ततः परं तस्य पुरुषस्य भेदज्ञानशून्ये परमकैवल्यरूपे अखण्डब्रह्मणि अवस्थानं भवति। एतदेव विदेहमुक्तिः कथ्यते। अज्ञाननाशः अस्माभिः कर्तव्यः। अज्ञानं सदसद्भ्याम् अनिर्वचनीयं भवति। पुनः च अज्ञानं ज्ञानविरोधि सत्त्वरजस्तमोगुणात्मकं च भवति। तस्य अज्ञानस्य नाशः यदा भवति तदा तस्मिन् क्षणे एव ब्रह्मज्ञानं भवति। चित्तं यदा निर्मलं भवति तदा तादृशं शुद्धं चित्तं ब्रह्मज्ञानं प्रति करणं भवति। ब्रह्म अखण्डं भवति। खण्डः नाम भेदः। भेदत्रयम् अस्ति। स्वगतः सजातीयः विजातीयः च। स्वम् आत्मानं गतः प्राप्तः भेदः स्वगतभेदः। वृक्षेण साकं वृक्षस्य यः भेदः स सजातीयः भेदः। वृक्षेण साकं शिलादीनां यः भेदः स विजातीयः भेदः। एतत् भेदत्रयरहितं ब्रह्म भवति। तत् ब्रह्म साक्षितया विराजमानं वर्तते। गुरुः यदा तत्त्वमस्यादिवाक्यम् उपदिशति तदा शुद्धचित्तयुक्तस्य शिष्यस्य अखण्डब्रह्माकाराकारिता चित्तवृत्तिः उदेति। सा चित्तवृत्तिः अखण्डब्रह्मगतम् अज्ञानं नाशयित्वा

अन्तिमे स्वयम् अपि नश्यति। यथा अग्निः सर्वं नाशयित्वा अन्तिमे स्वयमपि उपशान्तः भवति इति। अर्थात् अखण्डे ब्रह्मणि एव सर्वं पर्यवसितं भवति।

पाठे अधिगताः विषयाः-

- अज्ञानस्य नाशकः गुरुः भवति।
- अद्वितीयब्रह्मज्ञानस्य अद्वितीयब्रह्मप्राप्तिरेव फलम्।
- महावाक्यानि जीवब्रह्मणोः ऐक्यं प्रतिपादयन्ति।
- ब्रह्मणः नव तटस्थलक्षणानि सन्ति।
- अज्ञाननाशाय ब्रह्मणि वृत्तिव्याप्तिरपेक्षिता।
- प्रतिबिम्बस्य बिम्बम् अतिरिच्य कापि सत्ता नास्ति।
- ब्रह्म स्वयं प्रकाशस्वरूपं भवति।
- सर्वासाम् उपनिषदां जीवब्रह्मणोः ऐक्यप्रतिपादने एव तात्पर्यम्।
- ब्रह्मणि एव जगतः उत्पत्तिस्थितिलयाः भवन्ति।

पाठान्तप्रश्नाः

१. “प्रज्ञानं ब्रह्म” इत्यत्र प्रज्ञानशब्दस्य अर्थं प्रतिपादयत।

२. “अहं ब्रह्मास्मि” इत्यत्र अहंपदस्य अर्थम् आलोचयत।

३. मनः इन्द्रियं भवति इति पूर्वपक्षिमतम् उपस्थापयत।

४. गुरोः माहात्म्यं वर्णयत।

५. उपक्रमोपसंहारौ उदाहरणेन प्रतिपादयत।

६. “अहंवादः" नाम किम्?

७. परमः पुरुषार्थः कः?

८. अर्थवादस्य उदाहरणं दीयताम्।

९. फलं नाम किम्? ब्रह्मास्मि” इत्यत्र पञ्चदशीकारेण उक्तः ब्रह्मशब्दार्थः लिख्यताम्।

१०. षड्विधानि लिङ्गानि आलोचयत।

११. मनः न इन्दियम् इत्यत्र सिद्धानिनां मतं लिखत।

१२. अभ्यासः नाम किम्?

१३. अखण्डं ब्रह्म नाम किम्?

१४. छान्दोग्योपनिषदि कथितम् अभ्यासवाक्यं किम्?

१५. अखण्डाकाराकारिता चित्तवृत्तिः इत्यत्र आकारशब्दस्य तात्पर्यं किम्?

१६. अपूर्वता नाम किम्?

१७. ब्रह्मणः स्वरूपं वर्णयतु?

१८. फलरूपस्य लिङ्गस्य एकम् उपनिषद्वाक्यं लिखतु?

१९. ब्रह्म एव सर्वं प्रकाशयति इत्यत्र उपनिषद्वाक्यं किम्?

२०. अर्थवादः नाम किम्?

२१. परमः पुरुषार्थः कः?

२२. अर्थवादस्य उदाहरणं दीयताम्?

२३. फलं नाम किम्?

पाठगतप्रश्नानाम् उत्तराणि-

१. "प्रज्ञानं ब्रह्म" इति।

२. "अहं ब्रह्मास्मि" इति।

३. उपक्रमोपसंहारौ अभ्यासः अपूर्वता फलम् अर्थवादः उपपत्तिः चेति लिङ्गानि।

४. "इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः" इति कठोपनिषद्गता श्रुतिः।

५. प्रकरणे प्रतिपाद्यस्य वस्तुनः प्रतिपाद्यस्थले प्रशंसनम् अर्थवादः।

६. षड्विधतात्पर्यग्राहकलिङ्गोपेतं वाक्यं महावाक्यम्।

७. "यत्साक्षादपरोक्षाद्ब्रह्म" इति बृहदारण्यकोपनिषद्गता श्रुतिः।

८. रहस्यम् इति अर्थः।

९. परमं ब्रह्म न परिच्छिद्यते।

॥ इति नवदशः पाठः ॥